International Journal for Multidisciplinary Research (IJFMR)

E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# प्राचीनभारतीयविद्याशाखानां जगद्धिताय अवदानम्

**Rahul Trivedi**

Assistant Professor, Sanskrit, Government Arts College, Shahera

**शोधसारांशः**

भारतीयज्ञानपरम्परा सहस्रवर्षेभ्यः विस्तीर्णा विशिष्टा चास्ति। अयं ज्ञानसम्भारः मानवसमाजस्य समुचितविकासाय उपयुक्तः सिद्धः। प्राचीनकालादारभ्य भारतीयाः ऋषयः मानवजीवनस्य चारित्रिकम्, आध्यात्मिकं, सामाजिकं च उन्नयनं कर्तुं विविधैः ज्ञानोपायैः दृष्टिकोणैश्च योगदानं कृतवन्तः । अयं ज्ञाननिधिः न केवलं भारतस्य, अपि तु समस्तविश्वस्य बौद्धिकं धनमस्ति । भारतीयसंस्कृतेरात्मा एव भारतीयज्ञानपरम्परा अस्ति । प्राचीनभारते वेदेषु उपनिषत्सु दर्शनेषु च या जीवनदृष्टिः विवेचिता सा केवलं विषयगता नासीत्, अपि तु जीवनस्य परमलक्ष्यम् आत्मविकासं समाजोत्थानं च लक्ष्यीकृत्य उपदिष्टा। भारतीयमनीषिभिः युगानुगुणं विकसितानि दर्शनानि न केवलमाध्यात्मिकं मार्गदर्शनं कुर्वन्ति, अपि तु व्यावहारिकजीवनस्य विविधाङ्गेषु अपि पथप्रदर्शनं कुर्वन्ति । ऋषयः शिक्षायाः मूलरूपं गुरुकुलप्रणाल्याः माध्यमेन शिक्षाव्यवस्थां स्थापितवन्तः । योगः शरीरमनसोः सन्तुलनं स्थापयति, आयुर्वेदः च रोगनिवारणं स्वास्थ्यरक्षणं च करोति । गणिते खगोलविज्ञाने च आर्यभट-भास्कराचार्य-ब्रह्मगुप्तादीनां योगदानमद्यापि प्रासङ्गिकं वर्तते। इदं शोधपत्रं दर्शयति यत् भारतीयज्ञानपरम्परा केवलं तात्त्विकविचारणा नास्ति, अपि तु मानवसमाजस्य चतुर्मुखविकासस्य मूलाधारमपि आसीत् । एषा परम्परा न केवलं भारतवर्षस्य किन्तु समग्रमानवजातेः हिताय समर्पिता अस्ति । अतः इदं शोधपत्रमाधुनिकयुगे भारतीयज्ञानपरम्परायाः उपादेयतां, तस्याः वैज्ञानिकतां च प्रकाशयन् मानवविकासे अस्याः परम्परायाः अमूल्यं योगदानं प्रतिपादयति ।

**प्रमुखशब्दाः -** भारतीयज्ञानपरम्परा, प्राचीनभारतीयविद्याशाखाः, संस्कृतशिक्षा, वेदाः, आयुर्वेदः, योगशास्त्रम्, भारतीयदर्शनम्, मानवविकासः ।

## प्रस्तावना

भारतीयज्ञानपरम्परा भारतीयसंस्कृतेर्मूलाधारोऽस्ति। एषा परम्परा केवलं प्राचीनसमयस्य निधिः न, अपि तु अद्यापि मानवजीवनस्य सर्वतोमुखीनं विकासं कर्तुं समर्थाऽस्ति। अस्याः परम्परायाः मूले वेदाः, उपनिषदः, स्मृतयः, महाभारतं, रामायणं, दर्शनानि च सन्ति, येषु अमूल्यं तत्त्वज्ञानं, धर्मचिन्तनं, विज्ञानं च समाहितं दृश्यते । भारतीयज्ञानपरम्परा केवलं भारतीयात्मनः प्रतिनिधिर्नास्ति, किन्तु समग्रमानवसमाजाय अमूल्यं तात्त्विकनैतिकं च कोशं प्रदात्री अपि अस्ति । यत्र विज्ञानं तत्र धर्मः, यत्र तत्त्वज्ञानं तत्र व्यवहारदर्शनं, यत्र वेदाः तत्र विनयः - एषा परम्परा केवलमाध्यात्मिकं मार्गं न दर्शयति, अपि तु मानवजीवनस्य बहुमुखं विकासं साधयति ।

भारतीयपरम्परायामतीव प्राचीनात् कालादेव विविधाः विद्याशाखाः विकसिताः सन्ति - यथा वेदाः, उपनिषदः, आयुर्वेदः, योगः, न्यायदर्शनम्, अर्थशास्त्रम्, स्थापत्यविज्ञानम्, नाट्यशास्त्रमित्यादयः। एतेषां सर्वेषां मध्ये एकं सामान्यसूत्रं दृश्यते - मानवस्य चित्तविकासः, चारित्रिकशुद्धिः तथा सामाजिककल्याणस्य चिन्ता। अद्य यदा विज्ञानं तन्त्रज्ञानं च तीव्रगत्या अग्रे सरतः स्तः, तदाऽपि मानवः आन्तरिकशान्तेरभावात् विषण्णः दृश्यते। एतादृशे समये भारतीयज्ञानपरम्परा पुनरेकवारं नवप्रेरणायाः स्रोतःस्वरूपेण प्रस्तोतुं शक्यते।

मानवविकासे अस्याः परम्परायाः योगदानं केवलं शारीरिकं वा सामाजिकं न, अपि तु बौद्धिकमाध्यात्मिकं चास्ति। "सर्वे भवन्तु सुखिनः", "वसुधैव कुटुम्बकम्", "यत्र नार्यस्तु पूज्यन्ते", इत्यादयः सिद्धान्ताः केवलं भावात्मकाः प्रस्तावाः न, किन्तु व्यवहारयोग्यं दृष्टिकोणमपि प्रदर्शयन्ति। अतः अस्मिन् शोधपत्रे प्राचीनभारतीयविद्याशाखायाः विविधपक्षेभ्यः जगद्धिताय योगदानमनुशील्यते। एवं विश्लेषणेन न केवलम् अतीतकालस्य मूल्यवतीं ज्ञानसम्पदं जानीमः अपि तु अद्यतनसन्दर्भे तस्याः उपयोगितां च प्रकाशयामः। भारतीयज्ञानपरम्परा केवलम् ऐतिहासिकः सांस्कृतिकश्च निधिः न, अपि तु एका जीवनपद्धतिः एका मूल्यप्रणाली चाऽस्ति या युगे युगे मानवविकासाय प्रेरणां प्रदत्तवती।

**भारतीयज्ञानपरम्परायाः स्वरूपम्**

भारतीयज्ञानं केवलं ग्रन्थनिष्ठं नास्ति, अपि तु अनुभवपरम्परायाम् आधारितं जीवनपर्यन्तं च गतिशीलमस्ति। एषा परम्परा श्रुतिस्मृतिशास्त्रपुराणनाट्यतन्त्रलोकपरम्परारूपेण प्रवहति। अस्याः परम्परायाः मूलभूतं स्वरूपं वेदेषु दृश्यते। ऋग्वेदे 'ऋतं सत्यं' इति दार्शनिकसत्यं, यजुर्वेदे यज्ञीयसंस्कृतिः, सामवेदे संगीतपरम्परा, अथर्ववेदे आयुर्वेदस्तन्त्रविद्या च दृश्यते। एवं ब्राह्मणग्रन्थाः, आरण्यकानि, उपनिषदः च ज्ञानस्य विवरणं कुर्वन्ति। अतः एषा परम्परा "अहं ब्रह्मास्मि", "तत्त्वमसि", "सर्वं खल्विदं ब्रह्म" इत्यादिभिः महावाक्यैः आत्मानं ब्रह्मरूपेण दृष्टुं प्रेरयति। सामाजिकदृष्ट्या धर्मार्थकाममोक्षाः इति पुरुषार्थाः जीवनस्य ध्येयत्वेन स्थापिताः। एषः भारतीयदृष्टिकोणः मानवजीवनं केवलं उपभोगमात्रं न मन्यते, अपि तु मोक्षं परं लक्ष्यं मन्यते। भारतीयदर्शनानुसारं ज्ञानं त्रिविधं भवति - श्रुतिः (अपौरुषेया), स्मृतिः (ऋषिप्रणीता), अनुभूतिश्च। "आत्मानं विद्धि" – इत्येतत् उपनिषदां मूलवाक्यमस्ति। "सत्यं ज्ञानं अनन्तं ब्रह्म" - तैत्तिरीयोपनिषदि उक्तम्। अयं दृष्टिकोणः दर्शयति यत् भारतीयचिन्तनं केवलं स्थूलज्ञानं न, अपि तु चैतन्यपरकम् अन्तर्ज्ञानकेन्द्रितं चास्ति।

**"सा विद्या या विमुक्तये।"[१]**

विद्या केवलं पुस्तकेषु लभ्यमानं ज्ञानं न, अपि तु यत् जीवने प्रयोगशीलं भवति, यत् आत्मनः विकासाय समाजस्य च हिताय प्रयुज्यते - सा एव विद्या। विद्यायाः लक्ष्यं मुक्तिरेव - बन्धनात् मुक्तिः, अज्ञानान्धकारात् ज्योतिर्गमनम्। यत् ज्ञानं केवलं जीविकायै न, अपि तु आत्मोन्नतये चित्तविशुद्धये च प्रेरयति, तत् विद्या इत्युच्यते। एषा दृष्टिः मानवविकासस्य मूलाधारं स्थापयति। भारतीयज्ञानपरम्परा वेदानां प्रस्थानादारभ्य बहुविधविद्यानां विकासं कृतवती। वेदेषु धर्मः, ऋतम्, यज्ञः तथा

समाजसंरचनायाः मूल्यं प्रतिपादितम् । उपनिषत्सु तत्त्वज्ञानं, ब्रह्मविद्या, आत्मदर्शनं च विशदीकृतम् । “श्रीमद्भगवद्गीता” - एकः अमूल्यग्रन्थः यः कर्मयोगं, ज्ञानयोगं, भक्तियोगं च सङ्घट्य मानवस्य सम्यग्विकासमार्गं निर्दिशति । यथा गीतायामुक्तम् - “स्वधर्मे निधनं श्रेयः परधर्मो भयावहः” इति । एषा पङ्क्तिः मानवस्य स्वकर्तव्ये स्थैर्यं, आत्मस्वरूपे विश्वासं च प्रबोधयति । आत्मचिन्तनम्, आत्मनिर्माणम्, आत्मविश्वासः - एतानि मानवविकासे अत्यावश्यकानि तत्त्वानि सन्ति ।

**“तमसो मा ज्योतिर्गमय ।”[२]**

एषा सूक्तिः भारतीयदृष्टेः सारं प्रतिपादयति यत् ज्ञानं मानवजीवनस्य सर्वोत्तमं साधनं भवति । एषा ज्ञानपरम्परा केवलं दार्शनिकविचारैः न समृद्धा, अपि तु व्यवहारसिद्धान्तैरपि समृद्धा अस्ति । पतञ्जलिमुनेः योगदर्शनं, चरकसुश्रुतयोः आयुर्वेदः, कौटिल्यस्य अर्थशास्त्रं, भरतमुनेः नाट्यशास्त्रं, मनोः धर्मशास्त्रं, व्यासस्य महाभारतं च एतानि परम्परास्वरूपेण समाजस्य आचारप्रणाल्यां मानसिकस्वास्थ्ये, शासनक्षेत्रे, कलासंवेदने च समाहितानि सन्ति ।

“अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।” [३]

भारतीयसंस्कृतेः महत्त्वपूर्णः पक्षोऽस्ति “वसुधैव कुटुम्बकम्” इति दृष्टिकोणः । ईदृशी दृष्टिरेव मानवसमाजे सौहार्दं सहिष्णुतां च स्थापयितुं समर्था भवति । राजकीयचिन्तने कौटिल्येन अर्थशास्त्रे न्यायाधारितं लोकहितप्रधानं शासनं वर्णितम् । उक्तञ्च -

“प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥”[४]

एषा उक्तिर्दर्शयति यत् प्रजाहितं विना राज्यं निष्फलं भवति । एषा नीतिरेव अद्यतन राजनैतिकपरिस्थितौ अत्यावश्यकं पाथेयमस्ति । सांस्कृतिकक्षेत्रे भरतमुनेः नाट्यशास्त्रं समाजस्य दर्पणरूपेण स्थाप्यते । नाट्यं नृत्यं गानं च केवलं मनोरञ्जनाय न अपि तु समाजशिक्षणाय साधनं भवति ।

“नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्” ।[५]

एतादृशी दृष्टिः सांस्कृतिकविकासे ज्ञानपरम्परायाः योगदानं प्रदर्शयति । नाट्यकलया समाजस्य भावाः, विचाराः, जीवनमूल्यानि च प्रभावशालिरूपेण अभिव्यक्तिं प्राप्नुवन्ति । एवं कला सामाजिकजागरूकतायाः मानवीयमूल्यानां च विकासे महत्त्वपूर्णं माध्यमं भवति ।

**मानवविकासे वेदानां योगदानम्**

वेदाः मानवजीवनस्य सर्वपक्षीयविकासाय मार्गदर्शनं कुर्वन्ति । वेदाः ज्ञानस्य आदिस्रोतांसि अपि वर्तन्ते । ऋग्वेदे यजुर्वेदे सामवेदे अथर्ववेदे च जीवनस्य विविधपक्षेषु उपयोगी ज्ञानं दृश्यते । वेदाः न केवलं धार्मिकग्रन्थाः, अपि तु एतेषु विज्ञान-गणित-खगोल-औषध-नीत्यादीनां क्षेत्राणाम् अपि महत्वपूर्णं ज्ञानं दृश्यते ।

**आयुर्वेदस्य योगदानम्**

आयुर्वेदः केवलं रोगचिकित्सायाः शास्त्रं न, अपि तु सम्पूर्णजीवनपद्धतेः निर्देशकोऽस्ति। स्वस्थस्य स्वास्थ्यरक्षणं आतुरस्य विकारप्रशमनं च अस्य मुख्यलक्ष्यं विद्यते । चरकसंहिता सुश्रुतसंहिता च मानवशरीरस्य रक्षणे रोगनिवारणे च उपयोगिन्यौ स्तः। एवमेव आयुर्वेदे जीवनस्य चतुर्वर्गाणां समन्वयेन आरोग्यस्य, दीर्घायुषः, प्रसन्नत्वस्य च मार्गः प्रदर्श्यते।

"हिताहितं सुखं दुःखम् आयुः तस्य हिताहितम्।
मानं च तच्च यत्रोक्तम् आयुर्वेदः स उच्यते॥"[६]

अत्र चरकेण जीवनं केवलं रोगनिवारणाय न अपि तु जीवनव्यवस्थायाः सम्यग्विन्यासाय च प्रतिपादितम् अस्ति।

**योगशास्त्रं -** शरीरमनसोः संतुलनं साधयति। योगः तनुमनसोः सम्यग्विकासं करोति। योगेन आत्मचिन्तनं धैर्यं विवेकशक्तिश्च वर्धन्ते। अतः मानवविकासे योगस्य अवदानममूल्यमस्ति। योगशास्त्रे चित्तविकासः, चित्तनियन्त्रणं, समाधिसाधनं च वर्ण्यते । "योगश्चित्तवृत्तिनिरोधः" इति सूत्रं दर्शयति यत् योगः केवलं शारीरिकव्यायाममात्रं न, अपि तु मानसिकशुद्धेः आत्मज्ञानस्य च साधनमस्ति।

**गणितविज्ञानम् -** आर्यभट्टः, भास्कराचार्यः, वराहमिहिरः इत्यादिभिः गणित-ज्योतिष-रेखागणितादिषु क्षेत्रेषु महत्त्वपूर्णम् अवदानं कृतम्।

**नीतिशास्त्रं लोककला-साहित्यं च -** चाणक्यस्य अर्थशास्त्रं, विदुरनीतिश्च समाजव्यवस्थापनार्थम् उपयोगि मार्गदर्शनं प्रदत्तवन्तौ, तथा रामायण-महाभारत-नाटक-गीत-शिल्पादीनां माध्यमैः लोककला-साहित्येन च समाजे संस्कारप्रवर्तनं जातम्।

**मानवविकासे योगदानम् :**

भारतीयज्ञानपरम्परायाः योगदानं मानवविकासे बहुविधं दृश्यते -

- शारीरिकविकासः - योगः, आयुर्वेदश्च मानवशरीरस्य संतुलनाय आरोग्याय च उपयुक्तौ भवतः।
- मानसिकविकासः - ध्यानं, सांख्यदर्शनम्, आत्मबोधश्च चित्तशुद्धये मार्गं दर्शयन्ति।
- नैतिकविकासः - धर्मः, सत्यम्, अहिंसा, क्षमा, ब्रह्मचर्यं च भारतीयशिक्षायाः मूलतत्त्वानि सन्ति।
- सामाजिकविकासः - वर्णाश्रमव्यवस्था, सहजीवनं स्वधर्मपालनं च सामाजिकसङ्घटनस्य आधाराः।
- आध्यात्मिकविकासः - मोक्षमार्गे आत्मसाक्षात्कारः, तत्त्वज्ञानं, समत्वदृष्टिश्च वर्ण्यते।
- शैक्षिकविकासः - गुरुकुलपद्धतिः, तक्षशिला-नालन्दादयः विश्वविद्यालयाः च शिक्षायाः उत्कृष्टतमं रूपं प्रस्तुतवन्तः।
- आर्थिकविकासः – कृषिः, वाणिज्यं, हस्तशिल्पञ्च परम्परायाः आर्थिकाधाराः सन्ति।

## उदाहरणानि प्रमाणानि च

- योगदर्शनम् - पतञ्जलिमुनिना प्रतिपादितः अष्टाङ्गयोगः सम्पूर्णविश्वे स्वीकृतः, यः शारीरिकं मानसिकं च आरोग्यं संवर्धयति ।
- आयुर्वेदः - विश्वस्वास्थ्यसङ्गठनेन अपि आयुर्वेदस्य वैश्विकस्वीकृतिः प्रदत्ता । अद्यापि अस्य प्राकृतिकचिकित्साप्रणाल्याः श्रेष्ठमूल्यं सर्वैः स्वीक्रियते ।
- गणितम् - “शून्यस्य” आविष्कारः भारते जातः ।
- चाणक्यः - ‘अर्थशास्त्रम्’ ग्रन्थः आधुनिकराजनीतिशास्त्रस्य पूर्वगामी वर्तते ।
- नालन्दा तक्षशिला च - केवलं भारतस्य न, अपि तु सम्पूर्णजगतः विद्यार्थिनां केन्द्रभूते विश्वविद्यालये आस्ताम् ।
- आत्मज्ञानम् - “अहं ब्रह्मास्मि”, “तत्त्वमसि”, “सोऽहम्” इत्यादिश्रुतिवाक्यानि आत्मपरिचयस्य गूढतत्त्वं प्रदर्शयन्ति ।
- पाणिनिः - व्याकरणशास्त्रस्य सर्वश्रेष्ठं रूपं "अष्टाध्यायी" इति ग्रन्थं रचितवान् ।
- भास्कराचार्यः - ‘लीलावती’ नामकं ग्रन्थं रचितवान् यः गणितविज्ञानस्य अद्भुतसङ्कलनम् अस्ति ।
- ध्यानप्रणालिः - चित्तशुद्धये कार्यक्षमतेः वृद्धये च उपयोगिनी भवति ।
- गान्धीचिन्तनम् - सत्यम्, अहिंसा, स्वावलम्बनं च अद्यापि अत्यधिकं प्रासङ्गिकं वर्तते ।

## शिक्षायाः स्वरूपम् - गुरुकुलपरम्परा

- गुरुकुलपद्धतिः ज्ञानं केवलं बौद्धिकं न अपि तु व्यावहारिकं चारित्रिकं नैतिकं च दत्तवती । भारतीयपरम्परायां गुरोः परमं स्थानं प्राप्तम् ।
- “गुरुः ब्रह्मा गुरुः विष्णुः गुरुः देवो महेश्वरः । गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥”

## भारतीयदर्शनानि - तत्त्वविचारस्य गङ्गा

सांख्ययोगन्यायवैशेषिकमीमांसावेदान्ताः भारतस्य षड्दर्शनानि सन्ति । एतेषां मूलं मानवविकासाय एव । "अहिंसा सत्यं अस्तेयं ब्रह्मचर्यं अपरिग्रहः" - एते पञ्च यमाः योगसूत्रे निरूपिताः । भारतीयदर्शनानां माध्यमेन न्यायसांख्यमीमांसावेदान्ताः इत्यादीनि दर्शनानि मनुष्यस्य तर्कशक्तेः विवेकशक्तेः निर्णयनिपुणतायाः च विकासं कुर्वन्ति । “तर्कसम्मतं मतं ग्राह्यम्” - इत्युक्त्या सत्यसन्धानं विवेचनकौशलं च बौद्धिकविकासस्य हेतुः प्रतिपादितः ।

## चतुर्विधपुरुषार्थाः

कालान्तरात् ईश्वरः स्वप्रजायाः चित्तशुद्धये, मनःशान्तये च उत्कर्षाय नानाविधानि साधनानि प्रकटितवान् । मानवजीवनं बहुधा विवेकयुक्तं स्यात्, स्वकर्तव्यनिर्णयः सम्यक् भवेत्, इति

धर्मार्थकाममोक्षाः इति स्पष्टतया प्रतिपादिताः सन्ति । भारतीयदृष्ट्या धर्मस्य प्रथमं स्थानं वर्तते । धर्म एव जीवनस्य स्थैर्यं ददाति । धर्म एव राष्ट्रस्य सुदृढनीतिं स्थापयति । रामराज्यं धर्मराज्यं च एतेनैव प्रतिष्ठितम् । महाभारतेऽपि भगवता श्रीकृष्णेन स्वधर्मे स्थितिं, कर्मयोगे स्थितिं च प्रतिपाद्य महत्त्वपूर्णं मार्गदर्शनं कृतम् ।

"श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥"[७]

अतः धर्माधारितः जीवनमार्गः एव आत्मोन्नतिं जनयति । आध्यात्मिकदृष्ट्या च चतुर्विधपुरुषार्थेषु धर्म एव प्रमुखो भवति । धर्मेणैव अर्थः कामश्च नियन्त्रितौ भवतः । धर्मरहितौ कामार्थौ मानवजातिं पतने नेतुम् अर्हतः । उक्तञ्च -

"धर्मेण हीनाः पशुभिः समानाः।"[८]

भारतीयज्ञानपरम्परायां विविधशास्त्रेषु धर्मार्थकाममोक्षाः स्पष्टतया वर्णिताः सन्ति । तत्र धर्मः सत्य-अहिंसा-शौच-क्षमा-ब्रह्मचर्य-दयादिषु गुणेषु प्रतिष्ठितः अस्ति । एतत् पुरुषार्थचतुष्टयं मानवजीवनं सुसंस्कृतं समुन्नतं च करोति । "धर्मार्थकाममोक्षाणां साधनं योग उच्यते ।"[९] गीता, उपनिषदः, स्मृतयः, रामायणमहाभारतादयः ग्रन्थाः सर्वेऽपि चतुर्विधपुरुषार्थानां समुचितं निर्देशं कुर्वन्ति ।

**सामाजिकविकासे योगदानम्**

चातुर्वर्ण्यव्यवस्था, आश्रमधर्मः, सेवाभावना इत्यादयः सिद्धान्ताः मानवसमाजे समत्वम्, उत्तरदायित्वम्, अनुशासनं च स्थापयन्ति । अस्माकं शास्त्रेऽपि "सुखस्य मूलं धर्मः" इति नीतिवचनम् उक्तम् अस्ति । तदनुसारं सामाजिकदृष्ट्या भारतीयज्ञानपरम्परा 'वसुधैव कुटुम्बकम्' इत्युक्त्या सर्वेभ्यः समानतां सहिष्णुतां करुणां च प्रतिपादयति । "वसुधैव कुटुम्बकम्" - एषा सूक्तिः अद्यापि अन्तर्राष्ट्रीयसम्भाषणेषु उद्धृता भूत्वा वर्तमानमानवसमाजस्य एकत्वं प्रेरयति ।

**राजनीतिकविकासे योगदानम्**

राजनीतिकविकासे च कौटिल्यस्य 'अर्थशास्त्रं' उल्लेखनीयं वर्तते । तत्र न्यायाधिष्ठितराज्यव्यवस्थायाः कल्पना, करसङ्ग्रहनीतिः, जनकल्याणसम्बन्धिन्याः नीतयः च विवेचनं च दृश्यते । "प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्" - अयं सिद्धान्तः आदर्शराजव्यवस्थायाः आधारो वर्तते ।

**नारीविकासे दृष्टिः**

भारतीयज्ञानपरम्परायां स्त्रीणां महत्त्वं विशेषतया वर्णितम् अस्ति । अपाला-सावित्री-गार्गी-मैत्रेयी इत्यादयः विदुष्यः महिलाः ज्ञानपरम्परायाः सुदृढाः स्तम्भाः आसन् । मनुस्मृतौ निर्दिष्टं वर्तते यत् -

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।"[१०]

नारीशिक्षायाः, ज्ञानस्य च प्रसारे भारतीयपरम्परायां स्त्रीणां योगदानं महत्त्वपूर्णम् आसीत् । नारीणां सम्मानः, शिक्षणं, स्वावलम्बनं च समाजस्य समुन्नतौ महत्त्वपूर्णानि साधनानि भवन्ति ।

**विज्ञानक्षेत्रे योगदानम्**

गणितं, ज्योतिषं, वास्तुशास्त्रं, रसायनशास्त्रं, धातुविज्ञानं च - एतेषु क्षेत्रेषु भारतीयाः ऋषयः अग्रगण्याः आसन् । एतस्य निदर्शनरूपेण शुल्बसूत्राणि, आर्यभट्टीयं, चरकसंहिता, सुश्रुतसंहिता इत्यादयः ग्रन्थाः अद्यापि विज्ञानस्य आधाराः सन्ति ।

"पृथिव्याः सप्तद्वीपां मध्यगोलस्थितां च अक्षांशरेखां दर्शयति ।"

भारतीयज्ञानपरम्परा केवलमतीतानुस्मरणं न, अपि तु वर्तमानकालस्य समस्यासु समाधानम् अपि प्रदर्शयति । एषा परम्परा आध्यात्मिकं, सामाजिकं. नैतिकं च सर्वविधं मानवविकासं साधयति । अतः आधुनिकशिक्षायामपि अस्याः परम्परायाः समावेशोऽनिवार्यः वर्तते । विद्यालयीयपाठ्यक्रमे भारतीयज्ञानपरम्परायाः ज्ञानम् अनिवार्यम् अस्ति । संस्कृतभाषया एव संस्कारयुक्तस्य समाजस्य निर्माणं सम्भवति । एतद् तथ्यं ज्ञात्वा राष्ट्रीयमुक्तविद्यालयीशिक्षासंस्थानम् अस्य लक्ष्यस्य प्राप्त्यर्थं निरन्तरं प्रयासं करोति । प्रो. सरोजशर्मा महोदया कथयति - "भारतं संस्कृतिः संस्कृतम्" च - एते त्रयः शब्दाः केवलं शब्दाः न सन्ति, अपि तु प्रत्येकस्य भारतीयस्य भावनाः एव । भारतीयसंस्कृतेः संरक्षणं संवर्धनं च कर्तुं भारतीयज्ञानपरम्परायाः ज्ञानं परमावश्यकम् । अतः राष्ट्रीयशिक्षानीतिः अपि बहुभाषावादस्य प्रासङ्गिकत्वं स्वीकृत्य शिक्षाक्षेत्रस्य सर्वेषु स्तरेषु संस्कृतभाषां जीवनस्य मुख्यप्रवाहे समावेश्य तस्याः अङ्गीकरणे बलं दत्तवती अस्ति । अतः संस्कृताध्ययनेन छात्राः न केवलं स्वस्य अतीतेन गर्विताः भवन्ति अपि तु वर्तमानकालस्य सन्तुलितजीवनपद्धत्याः मार्गे गच्छन्ति, भविष्येऽपि च उत्साहिताः भविष्यन्ति । प्राचीनभारतीयशिक्षापद्धतिः व्यक्तेः सर्वाङ्गीणविकासे ध्यानं समर्पयति स्म । विनम्रता, सत्यता, अनुशासनं, आत्मनिर्भरता, आदरः च - एतेषु मूल्येषु बलं दत्तम् । भारतीयशिक्षायाः स्वरूपं व्यावहारिकं जीवनोपयोगि च आसीत् । अतः राष्ट्रीयशिक्षानीतिः प्राचीनभारतस्य गौरवशालिनम् अतीतं स्वीकृत्य केवलं न, अपि तु चरक-सुश्रुत-आर्यभट्ट-वराहमिहिर-मैत्रेयी-गार्गीप्रभृतीनां मनीषिणां विचारान्, कार्याणि च प्रारम्भिकस्तराद् आरभ्य विश्वविद्यालयस्तरं यावत् पाठ्यक्रमेषु समावेशयितुं प्रयतते ।

संस्कृतभाषायाम् एव सम्पूर्णं वैदिकवाङ्मयम्, रामायणम्, महाभारतम्, पुराणानि, स्मृतिग्रन्थाः, दर्शनशास्त्राणि, धर्मग्रन्थाः, काव्यानि, नाटकानि, व्याकरणशास्त्रं, ज्योतिषशास्त्रं च उपलभ्यन्ते, ये यथाशक्ति भारतीयसंस्कृतेः रक्षणे सहायकाः भवन्ति । संस्कृतभाषया एव संस्कारयुक्तस्य समाजस्य निर्माणं सम्भवति । संस्कारैः कायिक-वाचिक-मानसिक-पवित्रतया सह पर्यावरणस्य शुद्धताऽपि प्राप्तुं शक्यते । संस्काराणां वैज्ञानिकत्वमपि सिद्धं वर्तते । नासायाः वैज्ञानिकाः १९८७ तमवर्षे एव संस्कृतं सङ्गणकोपयोगाय श्रेष्ठतमा भाषा इति अभिजज्ञुः, यतो हि संस्कृतभाषा अन्तरिक्षे सन्देशप्रेषणाय सर्वोत्तमा वर्तते इति । अद्यापि अमेरिका-जर्मनीप्रभृतयः देशाः संस्कृतक्षेत्रे नित्यं नवीन-अनुसन्धानकार्येषु संलग्नाः सन्ति । वर्तमानसामाजिकपरिवर्तने च भारतीयमूल्येषु शिक्षाव्यवस्थायां समावेशिता आवश्यकी वर्तते । एषा समावेशिता प्राचीनभारतीयज्ञानपरम्परां विना न सम्भवति, अन्यथा अन्धानुकरणे एव वयं पतिष्यामः । उपनिषत्सु अपि उक्तम् अस्ति - "अन्धेनैव नीयमाना यथान्धाः"[१] इति । यदि दृष्टिहीनं

मार्गदर्शकं कुर्वीत तर्हि लक्ष्यप्राप्तिः कथं स्यात् ? एवं शिक्षायां भारतीयमूल्यानि संस्काराः च प्रकटीभवेयुः इति अस्मिन् प्रयत्ने राष्ट्रीयमुक्तविद्यालयीशिक्षासंस्थानम् ललितकला-संस्कृतशिक्षयोः क्षेत्रे निरन्तरं प्रवृत्तम् अस्ति। NIOS संस्था 'भारतीयज्ञानपरम्परा' नाम्ना नवीनां शाखाम् आरब्धवती। अस्याः अन्तर्गतं माध्यमिक-उच्चतरमाध्यमिकस्तरेषु संस्कृत-हिन्दीमाध्यमयोः पञ्च पाठ्यक्रमाः विकसिताः सन्ति - वेदाध्ययनम्, संस्कृतव्याकरणम्, भारतीयदर्शनम्, संस्कृतसाहित्यम्, संस्कृतभाषाविषयश्च। एवञ्च OBE कार्यक्रमेऽपि संस्कृत-हिन्दी-आङ्ग्लमाध्यमेषु विविधाः पाठ्यविषयाः स्वाध्ययनसामग्री च विकसिता। संस्कृतपाठ्यविषये रामायणकथाः महाकाव्यानि च अन्तर्भवन्ति। योगविषये पतञ्जलियोगसूत्राणि, सूर्यनमस्काराः, आसनप्रकाराः, प्राणायामः, क्रोधनियन्त्रणम्, एकाग्रता-स्मृतिविकासप्रशिक्षणं च पाठ्यक्रमे समाविष्टम् अस्ति। माध्यमिके, उच्चतरमाध्यमिके च सप्त नवीनपाठ्यक्रमाणां विकासाय अपि प्रयत्नः क्रियते - आयुर्वेदः, योगः, वेदपाठः, न्यायशास्त्रम्, ज्योतिषशास्त्रम्, अनुप्रयुक्तसंस्कृतव्याकरणम्, नाट्यकला च। एतेषां पाठ्यक्रमाणाम् उद्देश्यं छात्रान् भारतीयसंस्कृतेः समृद्धिं बोधयितुं, संस्कारविकासं च साधयितुं वर्तते।

**निष्कर्षः**

संस्कृतशिक्षायाः पुनरुत्थानं, योगदिवसस्य उद्घोषणा, आयुर्वेदस्य अन्तर्राष्ट्रीयस्वीकारः, भगवद्गीताध्ययनम् इत्यादिभिः विषयैः स्पष्टं दृश्यते यत् भारतीयज्ञानपरम्परा अद्यापि समाजे जागरूकतां प्रेरणां च ददाति। एतत् सर्वं समाहितं कृत्वा स्पष्टं भवति यत् भारतीयज्ञानपरम्परा मानवविकासे बहुसांस्कृतिकं बहुआयामी च योगदानं प्रदत्तवती अस्ति। एषा परम्परा बौद्धिकविकासं, नैतिकसाक्षात्कारं, मानसिकशुद्धिं, समाजैक्यं, आत्मदर्शनं च उद्दिश्य मानवमात्रम् उत्कर्षमार्गे नेतुं समर्था वर्तते।

**सन्दर्भाः**

1. महर्षिः पराशरः, *विष्णुपुराणम्*, प्रथमांशः, अध्यायः १९, श्लोकः ४१
2. *बृहदारण्यकोपनिषद्*, अध्यायः १, ब्राह्मणम् ३, मन्त्रः २८
3. *महोपनिषद्*, अध्यायः ४, श्लोकः ७१
4. आचार्यः कौटिल्यः, *कौटिलीयम् अर्थशास्त्रम्*, अधिकरणम् १, अध्यायः १९, सूत्रम् ३४
5. कालिदासः, *मालविकाग्निमित्रम्*, प्रथमोऽङ्कः, श्लोकः ४
6. महर्षिः चरकः, *चरकसंहिता*, सूत्रस्थानम्, अध्यायः १, श्लोकः ४१
7. महर्षिः वेदव्यासः, *श्रीमद्भगवद्गीता*, अध्यायः ३, श्लोकः ३५
8. नारायणपण्डितः, *हितोपदेशः*, प्रस्ताविका, श्लोकः २५
9. महर्षिः घेरण्डः, *घेरण्डसंहिता*, अध्यायः १, श्लोकः ४

10. महर्षिः मनुः, *मनुस्मृतिः*, अध्यायः ३, श्लोकः ५६
11. *कठोपनिषद्*, प्रथमाध्याये द्वितीया वल्ली, मन्त्रः ५

**सन्दर्भग्रन्थसूची**


1. **ऋग्वेदः** – *ऋग्वेदसंहिता* (मण्डल १-१०), सम्पादकः : स्वामी पदशेखरः, चौखम्बा विद्याभवन, वाराणसी।
2. **उपनिषद्** – *ईशाद्युपनिषदः* (सटीकम्), व्याख्याकारः: श्रीहरिकृष्णदास गोयलन्दका, गीता प्रेस, गोरखपुर।
3. **वेदव्यासः** – *श्रीमद्भगवद्गीता* (शाङ्करभाष्योपेता), गीता प्रेस, गोरखपुर।
4. **महर्षिः पतञ्जलिः** – *पातञ्जलयोगसूत्रम्* (व्यासभाष्य-तत्त्ववैशारदी-सहितम्), सम्पादकः: डॉ. रामशङ्कर भट्टाचार्यः, चौखम्बा संस्कृत संस्थान, वाराणसी।
5. **महर्षिः चरकः** – *चरकसंहिता* (आयुर्वेददीपिका-टीकासहिता), सम्पादकः: वैद्य यादवजी त्रिकमजी आचार्यः, चौखम्बा सुरभारती प्रकाशना, वाराणसी।
6. **महर्षिः सुश्रुतः** – *सुश्रुतसंहिता* (निबन्धसंग्रह-टीकासहिता), सम्पादकः: कविराज अम्बिकादत्त शास्त्री, चौखम्बा संस्कृत सीरीज, वाराणसी।
7. **आचार्यः कौटिल्यः (चाणक्यः)** – *कौटिलीयम् अर्थशास्त्रम्*, अनुवादकः सम्पादकश्च: डॉ. वाचस्पति गैरोला, चौखम्बा विद्याभवन, वाराणसी।
8. **भरतमुनिः** – *नाट्यशास्त्रम्* (अभिनवभारती-टीकासहितम्), सम्पादकः: आचार्य मधुसूदन शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी।
9. **आर्यभटः** – *आर्यभटीयम्* (भास्कर-भाष्योपेतम्), सम्पादकः: कल्पनाथ ओझा, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।
10. **भास्कराचार्यः** – *लीलावती* (वासनाभाष्य-सहिता), सम्पादकः: प्रो. लखनलाल झा, चौखम्बा सुरभारती प्रकाशना, वाराणसी।
11. **भारतसरकारस्य शिक्षा मन्त्रालयः** – *राष्ट्रीय शिक्षा नीति २०२० (NEP 2020)* एवं NIOS ('भारतीयज्ञानपरम्परा' पाठ्यक्रम-सामग्री), नवदेहली।